## विभाषा गमहनविदविशाम् । (६८/३०९९)

गम हन विद विश इत्येतेषां धातूनां वसौ विभाषा इडागमो भवति । गम – जग्मिवान्, जगन्वान् । 'मो नो धातोः' (८.२.६४/३४१) इति नकारः । हन – जघ्निवान्, जघन्वान् । विद – विविदिवान्, विविद्वान् । विश – विविशिवान्, विविश्वान् । विशिना साहचर्यादिह विदेस्तौदादिकस्य लाभार्थस्य ग्रहणम् । ज्ञानार्थस्य तु नित्यं विविद्वान् इत्येव भवति ।

[८३६] दृशेश्चेति वक्तव्यम् । (म.भा.३.३०१)

ददृशिवान्, ददृश्वान् (ऋ.४.३३.६) ॥

## सनिंससनिवांसम् । (६९/३६८३)

[1]सनोतेः सनतेर्वा धातोः सनिंससनिवांसम् इति निपात्यते । अग्निंत्वाग्ने सनिंससनिवांसम् (आ.श्रौ.१ ३.४.१६) । इडागम एत्वाभ्यासलोपश्च निपात्यते । सनिङ्पूर्वात् अन्यत्र सेनिवांसम् इत्येव भवति । छन्दसि इदं निपातनं विज्ञायते । भाषायां सेनिवांसम् इति भवति ॥

## ऋद्धनोः स्ये । (७०/२३६६)

ऋकारान्तानां [2]धातूनां [3]हन्तेश्च स्ये[4] इडागमो भवति । करिष्यति[5] । हरिष्यति । हनिष्यति । स्वरतेर्वेट्त्वात् 'ऋद्धनोः स्ये' इत्येतद्भवति विप्रतिषेधेन । स्वरिष्यति । [6]तपरकरणं विस्पष्टार्थम् ॥

## अञ्जेः सिचि । (७१/२५४६)

अञ्जेः सिचि इडागमो भवति । आञ्जीत्, आञ्जिष्टाम्, आञ्जिषुः । सिचि इति किम् ? अङ्क्ता अञ्जिता । ऊदित्वाद् विभाषा भवति ॥

## स्तुसुधूञ्भ्यः परस्मैपदेषु । (७२/२३८७)

स्तु सु धूञ् [7]इत्येतेभ्यः सिचि परस्मैपदे [8]परत इडागमो भवति । अस्तावीत् । असावीत् । अधावीत् । परस्मैपदेषु इति किम् ? अस्तोष्ट । [9]असोष्ट । अधोष्ट, अधविष्ट ॥

---

1. सविपूर्वस्य क. 2. धातूनां नास्ति क. 3. हनश्च क. 4. परतः इत्यधिकम् ह. 5. अकरिष्य. इत्यधिकम् क. ह. अहरिष्यत् इत्यधिकम् ह. 6. वाक्यमिदं नास्ति ब. क. 7. एतेषां ब. क. 8. परे क. 9. प्रासोष्ट असविष्ट क.